# Vastusutra UpaniShad

# વાસ્તુસૂત્રોપનિષત્

## Document Information

Text title : Vastusutra Upanishad

File name : vAstusUtropaniShat.itx

Category : upanishhat

Location : doc_upanishhat

Proofread by : Mohan Chettoor

Description/comments : See commentary in a separate file

Latest update : August 8, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 16, 2022

*sanskritdocuments.org*

# વાસ્તુસૂત્રોપનિષત્

અથ અથર્વવેદીય વાસ્તુસૂત્રોપનિષત્ ।

## પ્રથમપ્રપાઠકસ્ય સૂત્રાણિ

વાસ્તોષ્પતિર્જ્ઞેય ઇતિ ૧

ષટ્શિલ્પાઙ્ગપ્રયોગેણ પ્રજનયન્તિ રૂપાણિ ૨

યૂપમિદં જ્યોતિઃ ૩

વૃત્તજ્ઞાનં રેખાજ્ઞાનં ચ યો જાનાતિ સ સ્થાપકઃ ૪

શિલ્પાત્ પ્રતિમા જાયન્તે ૫

સ પ્રવહણઃ શિલ્પસૂત્રાધ્યાયં સ્થાપકવિદ્યાં ચાવદત્ ૬

શરીરમૂર્તિરહિતે મન આવેશ્ય વિશેષેણ વિકલ્પિદોષયુક્તં ભવતિ ઇતિ ૭

વાસ્તુષડઙ્ગમિતિ શ્રેષ્ઠં ૮

ષડ્ધા શૈલં જ્ઞેયં ૯

શૈલાદઙ્ગરાગજ્ઞાનં પ્રસરતિ ૧૦

## દ્વિતીયપ્રપાઠકસ્ય સૂત્રાણિ

નિર્દિષ્ટાર્થકપ્રતિમા ગ્રાહ્યા ૧

તત્પાતનં પ્રથમા ક્રિયા ૨

તન્મર્દનં દ્વિતીયા ક્રિયા ૩

વિલમિતિ મર્મજ્ઞેયં ૪

ન કૃત્યરૂપાર્થં રેખાકરણં કર્તવ્યં ૫

આદૌ વૃત્તં ૬

એકૈકસ્ય સંયોગે એકીભવતિ ૭

રેખાન્વયે સર્વાઙ્ગાણિ ન્યાસય ૮

તેજાંસિ સરલરેખાણિ ૯

નાભૌ રૂપકર્મ પ્રારભ્યતે ૧૦
પ્રાજાપત્યરીત્યા વૃત્તં હિ તેજસ્તદાઽપાં ભાસે ચતુરસ્રં ૧૧
કર્ણદ્વયં મરુ દ્ભાવેન આચરન્તિ ૧૨
ધરેવ કર્ણિકક્ષેત્રમાકર્ષયન્તિ સ્થાપકાઃ ૧૩
તત્ર મધ્યે લબ્ધબિન્દુ  રસાયાઃ પ્રાણઃ ૧૪
ત્રિહુતાગ્નિઃ સ્મર્યતેઽપિ ચ લોકે ૧૫
નિમ્નગાસ્ત્રિહુતા આપ ઇતિ ૧૬
ષટ્કોણકો હિ આકર્ષણીવિદ્યાવિશેષઃ ૧૭
યથા રૂપે તથા યૂપેઽનુચ્છેદાન્તા ગ્રાહ્યાઃ ૧૮
ખનનપ્રકારો ધ્યેયઃ ૧૯
સૂત્રાયને રેખાઃ સુભગા ભવન્તિ ૨૦
ઉત્થિતરેખા અચિરૂપાઃ પાર્શ્વગા અબ્રૂપાઃ તિર્યગ્રેખા મરુતરૂપા ઇતિ ૨૧
રૂપસૌભાગ્યાદ્ધ્યાનભાવો જાયતે ૨૨
અમિરેખાયામુત્તુઙ્ગરૂપાણિ જાયન્તે ૨૩
અબેરવાયામત્સકરૂપાણિ જાયન્તે ૨૪
મારુતરેરવાયાં તૈજસરૂપાણિ ૨૫
રેખાજ્ઞાનં સર્વમિતિ જ્ઞેયં ૨૬

## તૃતીયપ્રપાઠકસ્ય સૂત્રાણિ

રૂપસ્ય ભાવો મુખ્યઃ ૧
ભાવાનુસારતો રેખાવિધાનમિતિ જ્ઞેયં ૨
તેષાં બહુધા કૃત્યં શ્રેયઃ ૩
ન્યાસાર્થં કાલબોધો ધ્યેય ઇતિ ૪
ખનિત્રાણિ અભિમન્ત્રયેત્ ૫
ખનિત્રપઞ્ચકં શ્રેષ્ઠં ૬
રૂપપ્રકર્ષાર્થં રૂપાઙ્ગં સ્નિગ્ધમિતિ ૭
શિલ્પકારાઃ પ્રલેપયન્તિ દ્રાવકરસં ૮
એષાં હેતિવિદ્યા શ્રેષ્ઠા ૯
રક્ષાર્થં પર્ણમણિઃ પરિધેયઃ ૧૦
ભેદનાદઙ્ગસૌભગં પ્રભવતિ ૧૧
રેખાનુપાતેનાઙ્ગાનિ નિધેયાનીતિ શ્રેષ્ઠકૃત્યં ૧૨

ગાથાનુપ્રાસે લક્ષણં વ્યક્તં ભવતિ ૧૩
ધ્યાનપ્રયોગે રૂપસૌષ્ઠવં સ્પષ્ટં ભવતિ ૧૪
યથા પ્રકૃતિસ્તથા રૂપલક્ષણં ૧૫
અઙ્ગાનામર્ધાકલં સુષમં ધ્યેયં ૧૬
હર્સાવધિ ઉભયદિશિ ચોર્ધ્વે વર્ધયેત્ ૧૭
રક્ષાવિધાનેન વિઘ્નઘાતયઃ ૧૮
રેખાક્રમેણ ભેદનં ચતુર્ધા જ્ઞેયં ૧૯
નેમ્યોત્તરે રૂપાઙ્ગં ન વર્ધયેત્ ૨૦
ખનિત્રચાલનવિધિર્ધ્યેયવિશેષઃ ૨૧

## ચતુર્થપ્રપાઠકસ્ય સૂત્રાણિ

પ્રતીતાત્પ્રતીકઃ ૧
રૂપાદઙ્ગાનિ સઞ્જાયન્તે ૨
દ્વિધાતો બ્રહ્મ રૂપવદ્ભવતિ ૩
તત્ત્વજ્ઞાનેન કોષ્ઠકા મુખ્યાઃ ૪
વર્ગીકરણં મખ્યકૃત્યં ૫
કોષ્ઠકાન્તરાલે રૂપસ્યાવયવો ધ્યેયઃ ૬
પરિમિતાઙ્ગહારાદ્ભાવલક્ષણાનિ જાયન્તે ૭
કોષ્ઠકે વ્યતિક્રાન્તે રૂપમવિદ્ધં ભવતિ ૮
શુલ્બયજ્ઞાખ્ય સાધનં શિલ્પરૂપસ્ય સાધનમિતિ ૯
શિલ્પકારાણાં રૂપશૈલે રૂપશાલાદિ ધ્યેયં ૧૦
યૂપાદ્રૂપં રૂપાદ્યૂપ ઇતિ સ્વભાવઃ ૧૧
યૂપસ્ય માનં ધ્યેયં ૧૨
ષડ્ભાગસ્ય પ્રયોગો ધ્યેયઃ ૧૩
પુરુષસ્ય તદ્રૂપેઽઙ્ગસ્તમ્ભાશ્ચત્વારો ઽષ્ટાઙ્ગક્રમેણોપજાયન્તે ૧૪
પાલાશદણ્ડરજસંયોગે રેખામાનય ૧૫
નિમ્નાદૂર્ધ્વાવધિ સદારેખાદીનાચર ૧૬
પુરુષસ્તમ્ભ ઇવ સ્તમ્ભો વૈ યજ્ઞાખ્ય રૂપં ૧૭
યથાસ્તમ્ભસ્ય યૂપસ્ય દશાઙ્ગં તથા પુરુષસ્ય દશયજ્ઞપ્રજ્ઞાશ્ચ ૧૮
સ્થાપકાચાર્યાઃ સ્તમ્ભાદ્રૂપં બોધયન્તિ ૧૯
સ્તમ્ભઃ કામકામિનસ્ત્રિધામાનયન્તિ ૨૦

દૈવયજ્ઞાર્થં યૂપઃ ૨૧
તદા પિતૃમેધેન વૃષસ્તમ્ભં પશુમેધાર્થં મિથુનસ્તમ્ભં કામચારા હોમે રોપયન્તિ ૨૨
તદ્બોધે માનુષા રૂપજ્ઞા ભવન્તિ ૨૩
પુરુષસ્ય રૂપાકલે કોષ્ઠકસ્યાધોભાવરૂપં પ્રસરતિ ૨૪
દશાઙ્ગયૂપે રૂપે ઇતિ તસ્ય ભાવઃ સમાનઃ ૨૫
બ્રહ્મકીલાધારઃ બ્રહ્મકીલેન સહ ક્ષેત્રં વિભાજય ૨૬
અઙ્ગાદઙ્ગં સઞ્જાયતે ૨૭
રેખાસંયોગે તત્ક્ષેત્રેઽઙ્ગાનિ સૌભગાનિ ભવન્તિ ૨૮
ક્ષેત્રનેમિં રોધયેદિતિ રેખચત્વરે ચ ૨૯

## પઞ્ચમપ્રપાઠકસ્ય સૂત્રાણિ

ભાવસ્યારોપણં રૂપકર્માણિ વિધેયં ૧
ભાવસ્યાઽધારો રસઃ ૨
મનસિ વૃત્તિર્બહુધા પ્રજાયતે તદા ભિન્નભિન્નરસાદ્રૂપં નૈકં ભવતિ ૩
નવધા રસઃ ૪
પ્રથમરસઃ શ‍ૃઙ્ગારઃ ૫
શ‍ૃઙ્ગનરરૂપાર્થમભ્રેખા ગ્રાહ્યાઃ ૬
સ હાસો દ્વિતીયરસઃ ૭
મુખલક્ષણાદ્રસ જાનન્તિ સર્વે ઈક્ષણેન ૮
સ તૃતીયઃ કરુણરસભાવ ઇતિ ૯
રૌદ્રઃ શિલ્પકારેષુ ચતર્થો રસઃ ૧૦
તિર્યગ્રેખાયાં ભાવઃ પ્રકટો ભવતીતિ વિશેષઃ ૧૧
સ વીરભાવઃ પઞ્ચમઃ ૧૨
વૈરભાવે ઉત્કટે ભયઙ્કુરો ભવતિ સ વિલક્ષણઃ ષષ્ઠરસઃ ૧૩
તસ્યાઙ્ગમારુતરેખાયામિતિ સ સપ્તમઃ ૧૪
શાન્તભાવઃ સોઽષ્ટમો રસઃ ૧૫
ભાવાનુગતરૂપાણિ ચતુર્ધા મુખ્યાનિ ૧૬
લોકે ભાવબોધસ્ય હેતુર્મનઃ ૧૭
મનુષ્યાણાં વૃત્તિર્મુખ્યેતિ ૧૮
સઙ્કુલ્પાદ્વિકલ્પ ઇતિ વિશેષઃ ૧૯
એષ ભુવનકોષો દેહાનુભૂત્યા ક્રમઃ ૨૦

અરૂપાદ્ રૂપં તસ્ય ફલં ૨૧
દિશાનુસૃતે દિશાપાલાનુપાસન્તે ૨૨
એવં દૈવભેદાન્ માર્ગભેદા જાયન્તે ૨૩

## ષષ્ઠપ્રપાઠકસ્ય સૂત્રાણિ

ન્યાસધારણા શ્રેષ્ઠા ૧
વૃત્ત્યા દૈવચિન્તને ભેદઃ સઞ્જાયતે ૨
લક્ષણપ્રકાશાર્થં શિલ્પવિદ્યા ૩
ન્યાસોડલઙ્કારમુદ્રાયુધબાદ્યકક્ષવાહનોપદેવારિસ્તુવકક્રમેણ રૂપનવાઙ્ગવિશેષો ધ્યેયઃ ૪
તિસ્રઃ રેખાઃ શ્રેષ્ઠાઃ ૫
રૂપક્ષેત્રે કોષ્ઠકાલિર્મુખ્યા ૬
ષોડશકોષ્ઠકમધ્યે રૂપાણિ પ્રભવન્તિ તદ્રૂપાર્થં શ્રેષ્ઠં ૭
વિલમિતિ મર્મ બ્રહ્મેવ નિધેયં ૮
ષોડશકોષ્ઠકપ્રમાણવિભાવાસ્તુ બ્રહ્મદૈવજૈવોપદૈવયાજકક્રમેણ પઞ્ચધાધ્યેયઃ ૯
રૂપાઙ્ગં ચતુર્ધેતિ વિશેષઃ ૧૦
બિન્દુર્બ્રહ્મેવ બ્રહ્મધ્રુવં ૧૧
બ્રહ્મ સત્યાદૌ ૧૨
બ્રહ્મબિન્દ્વવલમ્બનેન રૂપાઙ્ગાણિ સૌભગાનિ ભવન્તિ ૧૩
અલઙ્કરણં દૈવભૂષણમિતિ ૧૪
પ્રમોદાદ્રતિઃ પ્રસરતિ ૧૫
કરમુદ્રા રૂપસ્ય ભાવં જ્ઞાપયતિ ૧૬
બાદ્યં બલં જ્ઞાપયતિ રૂપે ૧૭
આસનં ષડ્ધા જ્ઞેયં ૧૮
ગુણાનુસૃતં રૂપત્રયં ૧૯
વાહનં રૂપસ્ય પ્રકૃતિજ્ઞાપકવિશેષઃ ૨૦
ઉપદૈવતં પ્રતિરૂપમિતિ ૨૧
ઉપદૈવતાદ્રૂપજ્ઞાનં પ્રસરતિ ૨૨
અરિસન્ધા ધ્યેયા ૨૩
રૂપધારાયા વૃત્તિરિતિ શ્રેષ્ઠા ૨૪
સ્તોતૄણાં રૂપે સુભગવિશેષઃ ૨૫
પ્રજ્ઞાર્થમેતદ્ વાસ્તૂપાખ્યાનં ૨૬

ઇતિ અથર્વવેદીય વાસ્તુસૂત્રોપનિષત્ સમાપ્તા ।

Proofread by Mohan Chettoor

---

*Vastusutra UpaniShad*

pdf was typeset on October 16, 2022

Please send corrections to *sanskrit@cheerful.com*